# वैयाकरणसिद्धान्तकौमुदी

## संज्ञापरिभाषामात्रम्



मनोरञ्जनसेनापतिः

# वैयाकरणसिद्धान्तकौमुदी

## (संज्ञापरिभाषामात्रम्)

सम्पादकः
**डॉ० मनोरञ्जन् सेनापतिः**
उपाचार्यः, संस्कृतविभागः
श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः
एनात्तूर् काञ्चीपुरम् - ६३१५६१
तमिल्नाडु

PRATIBHA

**प्रतिभा प्रकाशन**
दिल्ली : : भारत

प्रथम संस्करण 2012

ISBN : 978-81-7702-296-4

© सम्पादक

मूल्य : 100

प्रकाशक :
डॉ० राधेश्याम शुक्ल
एम.ए., एम. फ़िल्., पी-एच.डी.
प्रतिभा प्रकाशन
(प्राच्यविद्या-प्रकाशक एवं पुस्तक-विक्रेता)
7259/23, अजेन्द्र मार्केट, प्रेमनगर
शक्तिनगर, दिल्ली-110007
दूरभाष : (O) 011-47084852, 09350884227
e-mail : pratibhabooks@ymail.com

टाईप सेटिंग : एस० के० ग्राफिक्स
दिल्ली-84

मुद्रक : एस० के० ऑफसेट, दिल्ली

# विषयानुक्रमणिका


| | |
|---|---|
| भूमिका | ५ |
| संज्ञासूत्राणां परिचयः | ९ |
| परिभाषासूत्राणां परिचयः | ११ |
| वैयाकरणसिद्धान्तकौमुदी | १३ |
| अथ संज्ञाप्रकरणम् | १६ |
| संज्ञाप्रकरणे पारिभाषिकशब्दाः | ५८ |
| अथ परिभाषाप्रकरणम् | ७२ |
| परिभाषाप्रकरणे पारिभाषिकशब्दाः | ९० |

# भूमिका

सम् उपसर्गपूर्वकं 'कृ' धातोः 'क्तक्तवतू निष्ठा' इति सूत्रेण क्त प्रत्ययेन सिद्धेयं संस्कृतभाषा प्राचीन-भारतीय-आर्याभाषा इत्युच्यते। भारतवर्षस्येयं प्राचीनभाषा आसीतिति विदुषां मतम्। भाषेयं देववाणी गीर्वारवाणी वेति इच्यते। वेदाविर्भावादनन्तरमियं भाषा वैदिकभाषा रूपेण प्रचलिता आसीत्। पुनः ऋषिभिः सरलीकृता संस्कृता च संस्कृतमिति संज्ञामवाप। संस्कृतभाषा तु सर्वासां भाषाणां जननीत्वेन परिगण्यते। तत्रापि अस्याः भाषायाः परिमार्जन तथा पवित्रीकरणं तु व्याकरणज्ञानेनैव जायते। व्याकरणज्ञानं विना भाषायाः प्रयोगः कर्तुं न शक्यते। यद्यपि इदानीन्तनसमाजे बहुविधं व्याकरणं दृश्यते तथापि एतेषां मूलं भवति संस्कृतव्याकरणमेव। व्याकरणमिदं सर्वासामपि विद्यानां मूलं भवति। वाक्यपदीयं, महाभाष्यं प्रभृतयः ग्रन्थाः व्याकरणस्य महिमानं प्रवदन्ति स्म। ज्योतिषाचार्याः भास्कराः कथयन्ति स्म-

**यो वेद वेदवदनं सहनं हि सम्यक्**
**ब्रह्मयाः स वेदमपि वेद किमन्यशास्त्रम् ।**
**तस्मात् प्रथममेतदधीत्य विद्वान्**
**शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।**

अत्र वेदवदनमिति शब्देन व्याकरणमेव सूच्यते। अतः व्याकरणमधीत्यैव स शास्त्रान्तरेषु प्रवेष्टुमर्हतां प्राप्नोति। किञ्च 'प्रथमो हि विद्वांसो वैयाकरणः व्याकरणमूलत्वात् सर्वविद्यानाम्' इति आनन्दवर्धनाचार्यः स्वकीये ध्वन्यालोके प्रतिपादयति स्म। एवमालोच्यमाने व्याकरणशास्त्रमेव सर्वेषां शास्त्राणां मूलभूतं अस्ति इति सुष्ठु ज्ञायते। तदुक्तं 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति। वि आङ् इत्युपसर्गद्वयपूर्वकं कृ धातोः करणे ण्वुल् प्रत्यये कृते 'युवोरनाकौ' इति सूत्रेण अनादेशे व्याकरणमिति पदस्य व्युत्पत्तिः। व्याक्रियन्ते

व्युत्पाद्यन्ते शब्दा: अनेनेति शब्दशास्त्रजनकं व्याकरणम्। अर्थात् येन अपशब्देभ्य: साधुशब्दानां ज्ञानं जायते तत् व्याकरणमिति। शास्त्रस्य शब्द प्रधानत्वात् शब्दशास्त्रमित्यपि नामान्तरं भवति। इदञ्च व्याकरणशास्त्रं वेदस्य षट्स्वङ्गेषु अन्यतमं भवति। तदुक्तं—

**छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते**

**ज्योतिषमयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

एवञ्च व्याकरणशास्त्रं वेदाङ्गेषु अन्यतमं भवति इत्यत: तेषु प्राधान्यं भवतीत्यस्य व्याकरणशास्त्रस्य अध्ययनं सर्वेषामपि आवश्यकं भवति। तदेव महाभाष्ये पतञ्जलि: 'ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च। प्रधानञ्च षट्सु अङ्गेषु व्याकरणम्। प्रधाने कृतो यत्न: फलवान् भवति। तस्मादध्येयं व्याकरण'मिति। अत: व्याकरणाध्ययनेन वेदाङ्गाध्ययनस्य फलं भवतीति आर्षाभिप्राय:। किञ्च अनेकशास्त्राध्ययनं कृतवान् इत्यत: व्याकरणाध्ययनं कृत: इति अंश: कीर्त्तिकर: भवति। तथा चोच्यते—

**यद्यपि बहु नाधीतं तथाऽपि पठ पुत्र व्याकरणम्।**

**स्वजनः श्वजनो माभूत् सकलं शकलं सकृच्छकृत्।।**

वाल्मीकियरामायणे ज्ञायते यत् त्रेतायुगे भगवत: श्रीरामचन्द्रस्य समयेऽपि व्याकरणशास्त्रस्य सुव्यवस्थित पठनपाठनं भवति स्म। तदुक्तं वाल्मीकीयरामायणस्य किष्किन्धाकाण्डे—

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहरतानेन न किञ्चिदपभाषितम्।।**

हनुमत: पिता वायु: शब्दशास्त्रस्य विशारद् आसीदिति निर्देश: वायुपुराणेऽपि उपलभ्यते। यथा—

**तत्राभिमानी भवगवान् वायुश्चातिक्रियात्मकः।**

**वातारणिः समाख्यातेः शब्दशास्त्रविशारदः।।**

एवं व्याकरणशास्त्रस्य प्राचीनतमत्वं सिद्ध्यति। अथ च पाणिनीयव्याकरणे

स्मृताः संज्ञा अपि प्राचीनाः। तासु कासाञ्चिन्निर्देशो गोपथब्राह्मणे उपलभ्यते- ओङ्कारम्पृच्छामः, को धातुः, किम्प्रातिपतिदकम्, का विभक्तिः, कः प्रत्ययः, कः स्वरः, कः उपसर्गः, कः निपातः, किं वै व्याकरणम्, को विकारः, को विकारी, कति मात्राः, कति वर्णाः, कत्यक्षराणि, कति पदानि, कति संयोगः, किं स्थाननादानुप्रदानानुकरणम् इति।।

निश्चिरूपेण व्याकरणशास्त्रस्योत्पत्तिः कदा सञ्जातेति विषये किञ्चित् कथनन्तु दुष्करमेव, परन्तूपलब्धवैदिकपदपाठानां रचनाकालात् प्रागेव संस्कृतव्याकरणशास्त्रस्य पूर्णत्वं सञ्जातमासीदिति तु प्रायेण निश्चप्रचमेव। तदानीन्तनैः विद्वद्भिः पठितसंस्कृतव्याकरणं यद्यपि माहेश्वरपारम्परिकमेव तथाऽपि व्याकरणपरम्परेयं प्रायशः ब्रह्मणः एव आरब्धा जाता। तथा चोक्तं ऋक् तन्त्रे- ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः ऋषयः ब्रह्मणेभ्यः (ऋक् तन्त्रम् १-४)।

व्याकरणशास्त्रस्य गहनं तथा काठिन्यं प्रदर्श्य पतञ्जलिमहर्षिः स्वकीये महाभाष्ये कथयति स्म- 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्र प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। बृहस्पतिः प्रवक्ता। इन्द्रश्चाध्येता। दिव्यं वर्षसहस्रम् अध्ययनकालः। न चान्तं जगाम। किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति वर्षशतं जीवति।' व्याकरणशास्त्रस्य गहनता तथा विशालताप्रतिपादनावसरे सारस्वतभाष्ये प्रमाणीकृतमासीत्—

**समुद्रवत् व्याकरणं महेश्वरे**
**तदर्धकुम्भोद्धरणं बृहस्पतौ।**
**तद्भागभागाच्च गतं पुरन्दरे**
**कुशाग्रविन्दूत्पतितं हि पाणिनौ।।**

इदं व्याकरणं न केवलं लौकिकभाषायाः शब्दानां वा साधुत्वासाधुत्वं बोधयति, अपि तु वैदिकानामपि शब्दानां बोधकत्वं करोति। व्याकरणं यद्यपि बहुविधं भवति, यथा ऐन्द्र चान्द्रमित्यादि तथाऽपि तत्र कानिचन व्याकरणानि केवलं लौकिकशब्दानामेव साधकानि आसन। कानिचन च व्याकरणानि वैदिकानामेव। अतः तेषामपेक्षया उभयत्रापि यस्य सुष्ठु प्रवृत्तिः भवति, पाणिनीयस्य